


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2022; 4(2): 08-13
Received: 07-02-2022
Accepted: 10-03-2022

**डॉ. रामायण सिंह:**
सहायक-प्राचार्य:, विश्वविद्यालय-संस्कृत-विभाग, तिलका-मांझी-भागलपुर-विश्वविद्यालय:, भागलपुरम्, बिहार, भारत

**Corresponding Author:**
**डॉ. रामायण सिंह:**
सहायक-प्राचार्य:, विश्वविद्यालय-संस्कृत-विभाग, तिलका-मांझी-भागलपुर-विश्वविद्यालय:, भागलपुरम्, बिहार, भारत

# भारविकृतौ पूर्ववर्तिकवीनां प्रभावस्य परिशीलनम्

**डॉ. रामायण सिंह:**

**सारांश:**
पूर्वकविभि: सह संवादनिर्माणे कवे: नैसर्गिकी प्रवृत्तिर्भवति। देश-काल-अवस्थारूपभेदत्वेन काव्यफलकमानन्त्यं सम्प्राप्नोति। कविगणा: पुरातनवस्तूनि मनसि निधाय तत् परीक्ष्य चाभिनवरचनासु प्रवर्तन्ते। यथा परिमितवर्णेभ्य: अपरिमितवाङ्मयानां पदसमूहानां रचना सम्भवति। तेभ्य: पदेभ्यश्च असीमितवाङ्मयानां निर्मितिर्जायते। तथैव प्राचीनकाव्यवस्तूनि नूतनकाव्ययोजनासु उपस्थापनान्तरं नूतनानीव परिदृश्यन्ते न तु प्राक्तनवत्। प्रौढविवेचकैरेतादृशा: कवय: आद्रियन्ते न तु परिभूयन्ते। शोधपत्रेऽस्मिन् बहुभि: साक्ष्यै: सह तथ्यमिदं प्रकाशयितुं यतिष्यते मया यत् कश्चनापि कवि: पूर्वकविप्रभावेण अस्पृष्टो न तिष्ठति, तत्रैव किरातार्जुनीयमहाकाव्यस्य रचनाकारो महाकविभारविरपि स्वीकरणीयोऽस्ति। महाकविरयं वाल्मीकि-व्यास-कालिदासादिभ्य: पूर्ववर्तिकविभ्य: प्रभूतं काव्यप्रभावमङ्गीकृतवानस्ति, यस्य विवेचनं स्थाप्यतेऽत्र।

**मुख्यशब्दा:** - भारवि:, कालिदास:, वाल्मीकि:, व्यास:, काव्यम्, अलङ्कार:, किरातार्जुनीयम्

## प्रस्तावना

कवे: कृति: काव्यं भवति। काव्यस्य निर्माणे शक्तिर्निपुणताभ्यासानां समुदायोऽनिवार्यो भवति। यथाह मम्मटाचार्य: -

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे॥ [1]

शक्तिस्तु कवित्वबीजरूप: संस्कारविशेषो नामात्र निपुणताया अभिप्रायो बहुविधशास्त्रेषु विचक्षणतप्रापणम्। काव्यनिर्माणे पौन: पुन्येन प्रयासोऽभ्यास:। पूर्ववर्तिकवीनामनुशीलनत्वात् परवर्तिकवय: प्रभाविता: भूत्वा तत्तत्काव्यतत्त्वानां नूतनरूपाणि प्रतिभाबलेन प्रस्थापयन्ति। फलतः शब्दार्थ-रस-रीति-गुणप्रभृतीनि काव्यतत्त्वानि वसन्ततौ द्रुमा: इव नूतनानि प्रतीयन्ते। यथोक्तमानन्दवर्धनेन –

दृष्टपूर्वा अपि ह्यर्था: काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमा:॥[2]

पूर्वकविभि: सह संवादनिर्माणे कवे: नैसर्गिकी प्रवृत्तिर्भवति। देश-काल-अवस्थारूपभेदत्वेन काव्यफलकमानन्त्यं सम्प्राप्नोति। अस्यामावस्थायामपि प्रतिभाशालिनामन्तराले समाना: उक्तय: बाहुल्येन जायन्ते। परन्तु प्रतिभाशालिन: तेषु सर्वेषु संवादेषु ऐकत्वं न भजन्ते। यथाहानन्दवर्धन: -

संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम्।
नैकरूपतया सर्वे ते मन्तव्या विपश्चिता॥[3]

कविगणा: पुरातनवस्तूनि मनसि निधाय तत् परीक्ष्य चाभिनवरचनासु प्रवर्तन्ते। यथा परिमितवर्णेभ्य: अपरिमितवाङ्मयानां पदसमूहानां रचना सम्भवति। तेभ्य: पदेभ्यश्च असीमितवाङ्मयानां निर्मितिर्जायते। तथैव प्राचीनकाव्यवस्तूनि नूतनकाव्ययोजनासु उपस्थापनान्तरं नूतनानीव परिदृश्यन्ते न तु प्राक्तनवत्। प्रौढविवेचकैरेतादृशा: कवय: आद्रियन्ते न तु परिभूयन्ते। प्रसङ्गेऽस्मिन् कथ्यते ध्वन्यालोककारेण –

अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी।
नूतने स्फुरति काव्यवस्तूनि व्यक्रमेव खलु सा न दुष्यति॥[4]

शोधपत्रेऽस्मिन् बहुभि: साक्ष्यै: सह तथ्यमिदं प्रकाशयितुं यतिष्यते मया यत् कश्चनापि कवि: पूर्वकविप्रभावेण अस्पृष्टो न तिष्ठति, तत्रैव किरातार्जुनीयमहाकाव्यस्य रचनाकारो महाकविभारविरपि स्वीकरणीयोऽस्ति। महाकविरयं वाल्मीकि-व्यास-कालिदासादिभ्य: पूर्ववर्तिकविभ्य: प्रभूतं काव्यप्रभावमङ्गीकृतवानस्ति, यस्य विवेचनं स्थाप्यतेऽत्र।

भारविकृतकिरातार्जुनीयस्य परिशीलनान्तरं सुस्पष्टं प्रतीयते यत् रचनेयं वाल्मीकिव्यासादीनां काव्यच्छायाभि: प्रभाविता विद्यते। महाकाव्यस्यास्य पदयोजनासु वस्तुयोजनासु रसयोजनासु च एतेषां कवीनां प्रतिबिम्बनं दरीदृश्यते।
मधुमयभणितय: भाषायां भावानानुकूलारोहावरोहश्च विन्यासो वाल्मीकिरामायणादेव प्रारभ्यन्ते। अनेन शब्दसन्धानकेन महर्षिणा वाल्मीकिना प्रभात-निशा-चन्द्रोदय-नगर-ग्राम-आश्रम-उपवन-नदी-सेना-युद्ध-ऋतुप्रभृतीनां काव्यतत्त्वानां यद् रससन्निविष्टं वर्णनकृतं तद्वर्णनं परवर्तिकवीनां कृते मार्गदर्शकभूतम्।
भारविकृतकिरातार्जुनीयमहाकाव्यमिदं मार्गदर्शि-महर्षि-वाल्मीकिना प्रभावितं वर्तते। सीता नैर्ऋताणां वधकालेऽवबोधयति रामं दण्डकारण्ये। समयेऽस्मिन् सा कथयति यत् स्त्री चपला स्वभावा भवति। न कोऽपि धीमानपि भवन्तमुपदिष्टुं समर्थो दृश्यते –

स्नेहाच्च बहुमानाच्च स्मारये त्वां न शिक्षये।
न कथञ्चन सा कार्या गृहीतधनुषा त्वया॥[5]
स्त्री चापादेतदुपाहृतं मे धर्मं च वक्तं तव क: समर्थ:।
विचारबुध्या तु सहानुजेन यद् रोचते तत् कुरु मा चिरेण॥[6]

इत्थं शालिनता प्रकटयति किरातार्जुनीयगता द्रौपदी युधिष्ठिरं प्रति। यथा –

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथाऽपि वक्तुं व्यवसाययन्ति मां निरस्तनारी समया दुराधय:॥[7]

सीतापहरणवेलायां दुःखिनं रामं पङ्कनिमग्नगजेन उपमिनोति आदिकवि: वाल्मीकि: -

अनासद्यमानं तु सीतां शोकपरायणाम्।
पङ्कमासाद्यविपुलं सीदन्तमिव कुञ्जरम्॥ [8]

एवमेव भारविणा युधिष्ठिरस्य चतुर्विद्यासम्पन्ना बुद्धिरुपमीयते पङ्कसंलग्नगजया, यथा –

चतसृष्वपि ते विवेकिनी नृप! विद्यासु निरुढिमागता।
कथमेत्य मतिविपर्ययं करिणी पङ्कमिवावसीदति॥ [9]

महर्षि: वाल्मीकि: कथयति यत् अनभ्यस्तविद्या शैथिल्यमुपैति। अयमेव सिद्धान्तो भारविमहाकवे: वर्त्तते यदनुसारं कवीनां कृते शास्त्राभ्यास: अत्यावश्यको विद्यते –

तस्य सन्दिदिहे बुद्धिस्तथा सीतां निरीक्ष्य च।
आम्नायानामयोगेन विद्यां प्रशिथिलामीव॥ [10]

अत्र च दृश्यते -

शुचि भूषयति श्रुतं वपु:। [11]

वाल्मीके: शब्दार्थयोरपि सिद्धान्तं गृह्णाति भारविमहाकवि:। यथा महर्षिणा प्रोक्तम् - अप्रतिकूलं, मृदुपूर्वं, शुभं हितयुक्तं वाक्यं व्यवहर्तव्यम् –

वाक्यमप्रतिकूलं च मृदुपूर्वं शुभं हितम्।
उपचारेण वक्तव्यो युक्तं च वसुधाधिप:॥ [12]

एकत: वाल्मीकिनादिकविना वाक्यं 'हृदयसुखम्' 'श्रुतिसुख'मिति[14] रूपेण प्रयुक्तमपरत: भारविणा वाणी 'सुखश्रुति:' "हृदयानि प्रसीदयन्ती'ति[15] रूपेण प्रयुक्ता। महर्षि अर्थानामुदारताया: सन्दर्भे कथयति -

उदारवृत्तार्थपदैर्मनोलैस्तदास्य रामस्य चकार कीर्तिमान्।
समाक्षरै: श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारदर्शनं॥ [16]

एवमेव भारविमहाकविरपि पदार्थानामौदार्यमाकाङ्क्षति।[17] इत्थं बहुविधरूपेषु महर्षे: प्रभावं परिलक्ष्यते किरातार्जुनीयमहाकाव्ये। शतसाहस्रीसंहिताकारवेदव्यास: स्वयं महाभारतं सर्वेषां कवीनां उपजीव्यं मन्यते। काव्यवैशिष्ट्यस्यास्य वर्णनं कर्तुं सर्वेषां कवीनां समूहोऽपि न क्षम: -

इदं कविवरै: सर्वैराख्यानमुपजीव्यते।
सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति॥
पर्जन्य इव भूतानामक्षयो भारतद्रुम:।[18]

रामायणवत्महाभारतमाश्रित्य विभिन्नानि काव्यानि रचितानि। तेषु बृहत्त्रयी-भारतमञ्जरी-अभिज्ञानशाकुन्तल-वेणीसंहार-बालभारत-नलचम्पू-प्रभृतीनि प्रमुखानि काव्यानि सन्ति। महाभारतस्य वनपर्वण: पञ्चादशसर्गात्मिकां लघ्वीं कथामाधृत्य (27-41 सर्गपर्यन्तम्) स्वकीयप्रातिभविशिष्टतयाभिनवरूपेषु परिवर्तनं कुर्वता महाकविभारविणा अष्टादशसर्गेषु किरातार्जुनीयं महाकाव्यमुपबृंहितम्। महाकाव्यस्यास्य भारवि: अष्टौ सर्गान् (4-11) कल्पनावैचित्र्येण कलात्मककौशलेन च परिपूरितवान्। श्रृङ्गारस्य परिपोषणार्थमिदमावश्यकं प्रतीयते। यथाह ध्वन्यालोककार: -

इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम्।
उत्प्रेक्ष्या - न्तराभीष्ट - रसोचित - कथोन्नय:॥ [19]

किरातार्जुनीये कथावस्तु-कथोपकथन-पात्रसन्निवेशप्रभृतीनि तत्त्वानि महाभारतात् उपस्थापितानि। द्वैतवनस्थं युधिष्ठिरं प्रति कृष्णा कथयति महाभारते -

इदं च शयनं दृष्ट्वा यच्चासीत् ते पुरातनम्।
शोचामि त्वां महाराज! दुःखानर्हं सुखोचितम्॥
दान्तं यच्च सभामध्यं आसनं रत्नभूषितम्।
दृष्ट्वा कुशवृषीं चेनां शोको मां प्रदहत्ययम्॥ [20]

भारविरपि इत्थमेव वर्णनं प्रस्तौति –

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥ [21]

महाभारतीया द्रौपदी अर्जुनं प्रति वदति यत् न तु तेजः त्याज्यम् न तु सदैव मार्दवमवलम्बनीयम्। यथाकालं द्वयोः आवश्यकता भवति –

तस्मान्नात्युत्सृजेत् तेजो न च नित्यं मृदुर्भवेत्।
काले-काले तु सम्प्राप्ते मृदुस्तीक्ष्णोऽपि वा भवेत्॥ [22]

इममेव भावं गृह्णन् भारविः भाषते –

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः॥ [23]

भारविकाव्ये पाशुपतास्त्रग्रहणान्तरं पार्थमभितः लोकपाला आगत्य तस्मै विभिन्नानि अस्त्राणि प्रदानं कुर्वन्ति। [24] वनपर्वणि इयमेव स्थिति अवलोकनीया –

ददामि तेऽस्त्रं दयितमहं पाशुपतं विभो।
समर्थो धारणे मोक्षे संहारे चासि पाण्डव॥ [25]

अत्रापि अर्जुनं निकषा दिव्यास्त्रप्रदानार्थं दिक्पाला आगच्छन्ति। [26]

एवम्प्रकारेण महाभारतकारव्यासदेवस्य भारविकृतौ विविधरूपेषु प्रभावाः स्पष्टतया दृश्यन्ते। किं बहुना? महाभारतीयपात्राणि एव किरातार्जुनीयेऽवलोक्यन्ते।

कविकुलगुरुकालिदासः स्वयुगीनां भारतीयां संस्कृतिमाधृत्य काव्यानि रचयामास। अस्य प्रभावो वैविध्येन किरातार्जुनीयमहाकाव्ये प्रकटितः। कालिदासद्वारा वर्णितस्य अतिथेः (कुशपुत्रस्य) प्रजां प्रति कल्याणप्रदाः योजनाः वितर्कविहिनाः वर्तन्ते स्म। अतएव ताः गर्भशालिधर्मयुक्ताः भवन्ति स्म। मन्वादिप्रवर्तितानि कर्त्तव्यानि अनेन कृतानि –

भव्यमुख्याः समारम्भः प्रत्यवेक्ष्यानिरत्ययाः।
गर्भशालिधर्माणः तस्य गूढं विपेचिरे॥
रात्रिंदिवविभागेषु यथादिष्टं महीक्षिताम्।
तत्सिषेवे नियोगेन स विकल्पपराङ्मुखः॥ [27]

अयमेव क्रियाविधिः भारवीयदुर्योधने प्राप्यते –

महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः। [28]
कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥ [29]

कविकुलगुरुः कालिदासो हिमालयवर्णनक्रमे ब्रूते यत् रात्रौ पर्वतगुहासु भास्वन्ति रत्नानि अतैलपूराः दीपा इव सततप्रकाशयन्ति भवन्ति स्म –

वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥ [30]

एतादृशं भावमाश्रित्य महाकविभारविरपि स्वकीये हिमालयवर्णनक्रमे विलिखति यदयं हिमालयः रात्रिषु स्वौषधीन्

प्रकाशयन् त्रिपुरदाहकालिकं स्मरणं शिवभक्तैः कारयति। तद्यथा श्लोके –

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना।
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः॥[31]

इत्थं दृश्यते यत् महाकवेः भारवेः हिमालयवर्णनं पूर्णतः कालिदासकृत-हिमालयवर्णनादेव गृहीतमस्ति। कालिदासीयानां राजहंसानां वर्णनं शफरीमत्स्यानां[32] च वर्णनं उपलभ्यते किरातार्जुनीये महाकाव्ये।[33] कालिदासीयरचनासु महादेवस्याष्टमूर्तीनां वर्णनं प्राप्यते, यथाभिज्ञानशाकुन्तले नाटके –

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिताव्याप्यविश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥[34]

महाकविभारविरपि शिवस्य पवन-पावक-जल-आकाशरूपाणां मूर्त्तिं स्तौति। यथाह भारविः -

यः सर्वेषामावरीता वरीयान् सर्वैर्भावैर्नावृत्तोऽनादिनिष्ठः।
मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै॥[35]

अत्र प्रतीयते यत् कालिदासप्रवृत्तं शिवाष्टकमूर्तिवन्दनां महाकविभारविः भाष्यं कुर्वन्नस्ति।

एवमेव 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्'[36] 'स्नेहः पापशङ्की'[37] कालिदासीयाः सूक्तयः 'न रम्यमाहार्यमपेक्षते गुणम्'[38] 'प्रेम पश्यति भयान्यपदेऽपि'[39] प्रभृतिषु परिवर्तितरूपेषु किरातार्जुनीये महाकाव्ये प्राप्यन्ते।

सम्यग्विवेचनान्तरं कथयितुं शक्यते यद् भारविकृतिः असन्दिग्धरूपेण प्राक्तनैः कविभावैः प्रभाविता विद्यत इत्यलं विस्तरेण।

**सन्दर्भः**


1. काव्यप्रकाशः 1.3
2. ध्वन्यालोकः 4.4
3. तत्रैव 4.11
4. तत्रैव 4.15
5. रामायणम् 3.9.24
6. तत्रैव 3.9.33
7. किरातार्जुनीयम् 1.28
8. रामायणम् 3.61.12-13
9. किरात० 2.6
10. रामायणम् 5.32.15
11. किरात० 2.32
12. रामायणम् 3.4.10
13. किरात० 1.5
14. इति हृदयसुखं निशम्य वाक्यं श्रुतिसुखमात्मवता विनीतमुक्तम्।
    प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः जगाम हर्षम्॥
    रामायणम् 1.18.59
15. विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्। किरात० 14.3
16. रामायणम् 1.2.42
17. किरात० 1.3
18. महाभारतम्, आदिपर्व 2.389, 1.92
19. ध्वन्यालोकः 3.11
20. महाभारतम्, वनपर्व 27.10-11
21. किरात० 1.38
22. महाभारतम्, वनपर्व 28.23

23. किरात० 2.38
24. तत्रैव 18.44, 46
25. महाभारतम्, वनपर्व 40.15
26. तत्रैव 41.1-21
27. रघुवंशम् 17.53, 49
28. किरात० 1.20
29. किरात० 1.09
30. कुमारसम्भवम् 1.10
31. किरात० 5.14, 24
32. ऋतुसंहार: 3.31.3
33. किरात० 1.3
34. अभिज्ञानशाकुन्तलम् 1.1
35. किरात० 18.37-40
36. अभिज्ञान० 1.29
37. तत्रैव चतुर्थोऽङ्कः
38. किरात० 4.23
39. तत्रैव 9.70